योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३१

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

एवमाकलयन्त्यौ ये निर्गत्य जगतो निजात् ।

अन्तःपुरं ददृशतुर्झटित्येव विनिर्गते ।। १

स्थितपुष्पभरापूर्णमहाराजमहाशवम् ।

शवपार्श्वोपविष्टान्तश्चित्तलीलाशरीरकम् ।। ५

घनरात्रितयाल्पाल्पमहानिद्राजनाकुलम् ।

धूपचन्दनकर्पूरकुङ्कुमामोदमन्थरम् ।। ३

तमालोक्यापरं भर्तुः संसारं गन्तुमादृता ।

पपात लीला संकल्पदेहेनात्रैव तन्नभः ।। ४

विवेश भर्तुः संकल्पसंसारं किंचिदाततम् ।

संसारावरणं भित्त्वा भित्त्वा ब्रह्माण्डकर्परम् ।। ५

प्राप सार्धं तया देव्या पुनरावरणान्वितम् ।

ब्रह्माण्डमण्डपं स्फारं तं प्रविश्य तथा जवात् ।। ६

ददर्श भर्तुः संकल्पजगज्जम्बालपल्वलम् ।

सिंहीव शैलकुहरं तमो जलदपङ्किलम् ।। ७

देव्यो विविशतुस्तत्ते व्योम व्योमात्मिके जगत् ।

ब्रह्माण्डेऽन्तर्यथा पक्वं मृदुबिल्वं पिपीलिके ।। ८

तत्र लोकान्तराण्यद्रीनन्तरिक्षमतीत्य ते ।

प्रापतुर्भूतलं शैलमण्डलाम्भोधिसंकुलम् ।। ९

मेरुणालंकृतं जम्बुद्वीपं नवदलोदरम् ।

गत्वाथ भारते वर्षे लीलानाथस्य मण्डलम् ।। 3.31.१०

एतस्मिन्नन्तरे तस्मिन्मण्डले मण्डितावनौ ।

चक्रेऽवस्कन्दनं कश्चित्सामन्तोद्रिक्तभूमिपः ।। ११

तेन संग्रामसंरम्भे प्रेक्षार्थं समुपागतैः ।

त्रैलोक्यभूतैस्तद्व्योम बभूवात्यन्तसंकटम् ।। १२

अशङ्कितागते तत्ते देव्यौ ददृशतुर्नभः ।

नभश्चरगणाक्रान्तमम्बुदैरिव मालितम् ।। १३

सिद्धचारणगन्धर्वगणविद्याधरान्वितम् ।

शूरग्रहणसंरब्धस्वर्गलोकाप्सरोवृतम् ।। १४

रक्तमांसोन्मुखोन्मत्तभूतरक्षःपिशाचकम् ।

पुष्पवृष्टिभिरापूर्णहस्तविद्याधराङ्गनम् ।। १५

वेतालयक्षकूश्माण्डैर्द्वन्द्वालोकनसादरैः ।

आयुधापातरक्षार्थं गृहीताद्रितटैर्वृतम् ।। १६

अस्त्रमार्गनभोभागविद्रवद्भूतमण्डलम् ।

आहोपुरुषिकाक्षुब्धप्रेक्षकामोदनोद्भटम् ।। १७

आसन्नभीमसंग्रामकिंवदन्तीपरस्परम् ।

लीलाहासविलासोत्कसुन्दरीधृतचामरम् ।। १८

धर्मप्रेक्ष्यप्रयुक्ताग्र्यमुनिस्वस्त्ययनस्तवम् ।

संपन्नानेकलोकेशवनितावसरस्तवम् ।। १९

स्वर्गार्हशूरानयनव्यग्रेन्द्रभटभासुरम् ।

शूरार्थालंकृतोत्तुङ्गलोकपालाख्यवारणम् ।। 3.31.२०

आगच्छच्छूरसन्मानोन्मुखगन्धर्वचारणम् ।

शूरोन्मुखामरस्त्रैणकटाक्षेक्षितसद्भटम् ।। २१

वीरदोर्दण्डकाश्लेषलम्पटस्त्रीगणाकरम् ।

शुक्लेन शूरयशसा चन्द्रीकृतदिवाकरम् ।। २२

श्रीराम उवाच ।

भगवञ्छूरशब्देन कीदृशः प्रोच्यते भटः ।

स्वर्गालंकरण कः स्यात्को वा डिम्भाहवो भवेत् ।। २३

श्रीवसिष्ठ उवाच ।

शास्त्रोक्ताचारयुक्तस्य प्रभोरर्थेन यो रणे ।

मृतो वाथ जयी वा स्यात्स शूरः शूरलोकभाक् ।।२४

अन्यथा प्राणिकृत्ताङ्गो रणे यो मृतिमाप्नुयात् ।

डिम्भाहवहतः प्रोक्तः स नरो नरकास्पदम् ।। २५

अयथाशास्त्रसंचारवृत्तेरर्थेन युध्यते ।

यो नरस्तस्य संग्रामे मृतस्य निरयोऽक्षयः ।। २६

यथासंभवशास्त्रार्थलोकाचारानुवृत्तिमान् ।

युध्यते तादृशश्चैव भक्तः शूरः स उच्यते ।। २७

गोरर्थे ब्राह्मणस्यार्थे मित्रस्यार्थे च सन्मते ।

शरणागतयत्नेन स मृतः स्वर्गभूषणम् ।। २८

परिपाल्यस्वदेशैकपालने यः स्थितः सदा ।

राजा मृतास्तदर्थं ये ते वीरा वीरलोकिनः ।। २९

प्रजोपद्रवनिष्ठस्य राज्ञोऽराज्ञोऽथ वा प्रभोः ।

अर्थेन ये मृता युद्धे ते वै निरयगामिनः ।। 3.31.३०

ये हि राज्ञामराज्ञां वाप्ययथाशास्त्रकारिणाम् ।

रणे म्रियन्ते छिन्नाङ्गास्ते वै निरयगामिनः ।। ३१

धर्म्यं यथा तथा युद्धं यदि स्यात्तर्हि संस्थितिः ।

नाशयेयुरलं मत्ताः परलोकभयोज्झिताः ।। ३२

यत्र यत्र हतः शूरः स्वर्ग इत्यवशोक्तयः ।

धर्मे योद्धा भवेच्छूर इत्येवं शास्त्रनिश्चयः ।। ३३

सदाचारवतामर्थे खड्गधारां सहन्ति ये ।

ते शूरा इति कथ्यन्ते शेषा डिम्भाहवाहताः ।। ३४

तेषामर्थे रणे व्योम्नि तिष्ठन्त्युत्कण्ठिताशयाः ।

शूरीभूतमहासत्त्वदयितोक्तिसुराङ्गनाः ।। ३५

विद्याधरीमधुरमन्थरगीतिगर्भं

मन्दारमाल्यवलनाकुलकामिनीकम् ।

विश्रान्तकान्तसुरसिद्धविमानपङ्क्ति

व्योमोत्सवोच्चरितशोभमिवोल्ललास ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे युद्धप्रेक्षिकास्थिताम्बरवर्णनं नामैकत्रिंशः सर्गः ।। ३१ ।।